दुःक(दुष्क)र्ण पु० ६व० । धृतराष्ट्रपुत्रभेदे "दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च" भा० आ० ६७अ० तत्पुत्रोक्तौ ।

दुःख दुःखकरणे कण्ड्वा० पर०अक० सेट् । दुःख्यति अदुःख्यीत् अदुःखीत् । [अदुदुःखत् त ।

दुःख तत्क्रियायाम् अद–चु०उभ०अक० सेट् । दुःखयति ते

दुःख न० दुष्टानि खानि यस्मिन्, दुष्टं खनति खन–ड, दुःख–अच् वा । सांख्यादिमतसिद्धे प्रतिकूलवेदनीये रजःकार्ये १चित्तादिधर्मभेदे । न्यायमते २आत्मधर्मभेदे "बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा । धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश । अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्" भाषा० "अधर्मत्वेन दुःखत्वेन कार्य्यकारणभावः । प्रतिकूलं, दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकविषयः प्रतिकूल इत्यर्थः" सि० मु० । "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्" गौ० सू० "यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान् । तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनोदर्शनप्रतिसन्धानाद् भवति लिङ्गमात्मनः, नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति । एवमेकस्यानेकार्थदर्शिनोदर्शनप्रतिसन्धानाद्दुःखहेतौ द्वेषः । यज्जातीयो यस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थं पश्यन्नादातुम् प्रयतते, सोऽयम् प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातारमन्तरेण न स्यात् नियतविषये बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति एतेन दुःखहेतौ प्रयत्नो व्याख्यातः । सुखदुःखस्मृत्या चायं तत्साधनमाददानः सुखमुपलभते दुःखमुपलभते सुखदुःखे वेदयते पूर्वोक्त एव हेतुः" भा० "द्वितीयसूत्रभाष्ये च 'दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसास्तेयप्रतिषिद्धपरद्रोहं परद्रव्याभीप्सा नास्तिक्यञ्चेति सेयं पापात्मिका प्रवृत्तिरधर्म्माय'" उक्तम् ।

कणादसूत्रे उपस्कारकृता च सुखदुःखयोः परस्परभेदः, ज्ञानाद्भेदश्च साधितो यथा

"इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः" सू० । "आत्मगुणानां कारणभेदव्युत्पादनं दशमाध्यायार्थः, तत्र "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति गौतमीये प्रमेयविभागसूत्रे सुखस्यानभिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुखदुःखयोरेव प्रथमं भेदमाह । सुखदुःखयोर्मिथः परस्परमर्थान्तरभावो भेदो वैजात्यमिति यावत् कुत इत्यत आह इष्टानिष्टकारणविशेषात् इष्टम् इष्यमाणं स्रक्चन्दनवनितादि अनिष्टमनिष्यमाणमहिकण्टकादि, तद्रूपं यत्कारणं तस्य विशेषाद्भेदात् कारणवैजात्याधीनं कार्य्यवैजात्यमावश्यकं यतः । भेदकान्तरमाह विरोधात् सहानवस्थानलक्षणात् नह्येकस्मिन्नात्मन्येकदा सुखदुःखयोरनुभवः । चकारादनयोः कार्य्यभेदं भेदकं समुच्चिनोति, तथाहि अनुग्रहाभिष्वङ्गनयनप्रसादादि सुखस्य, दैन्यमुखमालिन्यादि दुःखस्य कार्य्यमिति ततोऽप्यनयोर्भेदः । तदुक्तं प्रशस्ताचार्यैः "अनुग्रहलक्षणं सुखं स्रगाद्यभिप्रेतविषयसान्निध्ये सति इष्टोपलब्धीन्द्रियार्थसन्निकर्षाद्धर्माद्यपेक्षादात्ममनसोः संयोगाद्यद्यदनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत् सुखम्" इति, तदिदमतीतेषु स्रक्चन्दनादिषु स्मृतिजम्, अनागतेषु सङ्कल्पजम्, गौतमीये सूत्रे सुखापरिगणनं वैराग्याय, सुखमपि दुःखत्वेन भावयतो वैराग्यं स्यादेतदर्थमिति" उप०सू० । "नन्वासातां सुखदुःखे परस्परं भिन्ने, ज्ञानादभिन्ने स्यातां स्मृत्यनुभववदित्यत आह उप०सू० "संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः" सू० "सुखदुःखयोर्ज्ञानान्तरत्वे ज्ञानभिन्नत्वे संशयनिर्णयावान्तरत्वाभावो हेतुर्लिङ्गमित्यर्थः, तदयमर्थः सुखं दुःखं वा ज्ञानं भवत् संशयरूपं वा स्यात् निर्णयरूपं वा, नाद्यः कोटिद्वयानुल्लेखित्वात्, न द्वितीयः एककोट्यनुल्लेखित्वात्, तथा च यावद्विशेषबाधात् सामान्यबाधः, द्वावेव हि ज्ञानस्य विशेषौ संशयत्वं निर्णयत्वञ्च, तदुभयञ्च, सुखे दुःखे च बाधितमिति ज्ञानत्वमपि तत्र बाधितम् । चकारादनुभवबाधं समुच्चिनोति सुखदुःखयोरहं सुखी दुःखीति मानसोऽनुभवो नत्वहं जाने सन्देह्मि निश्चिनोमीत्याकारोऽनुभव इति । भेदकान्तरमाह" उप०सू० "तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्याम्" सू० "तयोः संशयनिर्णययोर्निष्पत्तिरुत्पत्तिः प्रत्यक्षाल्लिङ्गाच्च सुखं दुःखं वा न प्रत्यक्षसामग्रीजन्यं न वा लिङ्गजन्यम्, चतुर्विधं हि सुखं वैषयिकं मानोरथिकम् आभिमानिकमाभ्यासिकञ्च, तत्र त्रयाणामिन्द्रियसन्निकर्षप्रभवत्वं नास्त्येव । प्रथममिन्द्रियार्थसन्निकर्षजन्यत्वात् ज्ञानं स्यादिति चेन्न सामग्र्येकदेशस्य कार्येषु साजात्यानापादकत्वात् अन्यथा दिक्कालसाधारणत्वेन सकलकार्यैकजात्यापत्तेः, किञ्च इन्द्रियार्थसन्निकर्षादुत्पद्यमानं सुखं निर्विकल्पकं वा स्यात् सविकल्पकं